# ॥ वाल्मीकि रामायण॥

## ५ सुन्दरकाण्ड

### अध्याय ६०

तानुवाच हरिश्रेष्ठो हनूमान्वानरर्षभः ।
अव्यग्रमनसो यूयं मधु सेवत वानराः ॥१॥

श्रुत्वा हनुमतो वाक्यं हरीणां प्रवरोऽङ्गदः ।
प्रत्युवाच प्रसन्नात्मा पिबन्तु हरयो मधु ॥२॥

अवश्यं कृतकार्यस्य वाक्यं हनुमतो मया ।
अकार्यमपि कर्तव्यं किमङ्ग पुनरीदृशम् ॥३॥

अन्दगस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः ।
साधु साध्विति संहृष्टा वानराः प्रत्यपूजयन् ॥४॥

पूजयित्वाङ्गदं सर्वे वानरा वानरर्षभम् ।
जग्मुर्मधुवनं यत्र नदीवेग इव द्रुतम् ॥५॥

ते प्रहृष्टा मधुवनं पालानाक्रम्य वीर्यतः ।
अतिसर्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीम् ॥६॥

उत्पत्य च ततः सर्वे वनपालान्समागताः ।
ताडयन्ति स्म शतशः सक्तान्मधुवने तदा ॥७॥

मधूनि द्रोणमात्राणि बहुभिः परिगृह्य ते ।
घ्नन्ति स्म सहिताः सर्वे भक्षयन्ति तथापरे ॥८॥

के चित्पीत्वापविध्यन्ति मधूनि मधुपिङ्गलाः ।
मधूच्चिष्टेन के चिच्च जघ्नुरन्योन्यमुत्कटाः ॥९॥

अपरे वृक्षमूलेषु शाखां गृह्य व्यवस्थितः ।
अत्यर्थं च मदग्लानाः पर्णान्यास्तीर्य शेरते ॥१०॥

उन्मत्तभूताः प्लवगा मधुमत्ताश्च हृष्टवत् ।
क्षिपन्त्यपि तथान्योन्यं स्खलन्त्यपि तथापरे ॥११॥

के चित्क्ष्वेडान्प्रकुर्वन्ति के चित्कूजन्ति हृष्टवत् ।
हरयो मधुना मत्ताः के चित्सुप्ता महीतले ॥१२॥

येऽप्यत्र मधुपालाः स्युः प्रेष्या दधिमुखस्य तु ।
तेऽपि तैर्वानरैर्भीमैः प्रतिषिद्धा दिशो गताः ॥१३॥

जानुभिश्च प्रकृष्टाश्च देवमार्गं च दर्शिताः ।
अब्रुवन्परमोद्विग्ना गत्वा दधिमुखं वचः ॥१४॥

हनूमता दत्तवरैर्हतं मधुवनं बलात् ।
वयं च जानुभिः कृष्टा देवमार्गं च दर्शिताः ॥१५॥

ततो दधिमुखः क्रुद्धो वनपस्तत्र वानरः ।
हतं मधुवनं श्रुत्वा सान्त्वयामास तान्हरीन् ॥१६॥

एतागच्छत गच्छामो वानरानतिदर्पितान् ।
बलेनावारयिष्यामो मधु भक्षयतो वयम् ॥१७॥

श्रुत्वा दधिमुखस्येदं वचनं वानरर्षभाः ।
पुनर्वीरा मधुवनं तेनैव सहिता ययुः ॥१८॥

मध्ये चैषां दधिमुखः प्रगृह्य सुमहातरुम् ।
समभ्यधावद्वेगेना ते च सर्वे प्लवङ्गमाः ॥१९॥

ते शिलाः पादपांश्चापि पाषाणांश्चापि वानराः ।
गृहीत्वाभ्यागमन्क्रुद्धा यत्र ते कपिकुञ्जराः ॥२०॥

ते स्वामिवचनं वीरा हृदयेष्ववसज्य तत् ।
त्वरया ह्यभ्यधावन्त सालतालशिलायुधाः ॥२१॥

वृक्षस्थांश्च तलस्थांश्च वानरान्बलदर्पितान् ।
अभ्यक्रामन्त ते वीराः पालास्तत्र सहस्रशः ॥२२॥

अथ दृष्ट्वा दधिमुखं क्रुद्धं वानरपुङ्गवाः ।
अभ्यधावन्त वेगेन हनूमत्प्रमुखास्तदा ॥२३॥

तं सवृक्षं महाबाहुमापतन्तं महाबलम् ।
आर्यकं प्राहरत्तत्र बाहुभ्यां कुपितोऽङ्गदः ॥२४॥

मदान्धश न वेदैनमार्यकोऽयं ममेति सः ।
अथैनं निष्पिपेषाशु वेगवद्वसुधातले ॥२५॥

स भग्नबाहुर्विमुखो विह्वलः शोणितोक्षितः ।

मुमोह सहसा वीरो मुहूर्तं कपिकुञ्जरः ॥ २६॥

स कथं चिद्विमुक्तस्तैर्वानरैर्वानरर्षभः ।
उवाचैकान्तमागम्य भृत्यांस्तान्समुपागतान् ॥ २७॥

एते तिष्ठन्तु गच्छामो भर्ता नो यत्र वानरः ।
सुग्रीवो विपुलग्रीवः सह रामेण तिष्ठति ॥ २८॥

सर्वं चैवाङ्गदे दोषं श्रावयिष्यामि पार्थिव ।
अमर्षी वचनं श्रुत्वा घातयिष्यति वानरान् ॥ २९॥

इष्टं मधुवनं ह्येतत्सुग्रीवस्य महात्मनः ।
पितृपैतामहं दिव्यं देवैरपि दुरासदम् ॥ ३०॥

स वानरानिमान्सर्वान्मधुलुब्धान्गतायुषः ।
घातयिष्यति दण्डेन सुग्रीवः ससुहृज्जनान् ॥ ३१॥

वध्या ह्येते दुरात्मानो नृपाज्ञा परिभाविनः ।
अमर्षप्रभवो रोषः सफलो नो भविष्यति ॥ ३२॥

एवमुक्त्वा दधिमुखो वनपालान्महाबलः ।
जगाम सहसोत्पत्य वनपालैः समन्वितः ॥ ३३॥

निमेषान्तरमात्रेण स हि प्राप्तो वनालयः ।
सहस्रांशुसुतो धीमान्सुग्रीवो यत्र वानरः ॥ ३४॥

रामं च लक्ष्मणं चैव दृष्ट्वा सुग्रीवमेव च ।
समप्रतिष्ठां जगतीमाकाशान्निपपात ह ॥ ३५॥

स निपत्य महावीर्यः सर्वैस्तैः परिवारितः ।
हरिर्दधिमुखः पालैः पालानां परमेश्वरः ॥ ३६॥

स दीनवदनो भूत्वा कृत्वा शिरसि चाञ्जलिम् ।
सुग्रीवस्य शुभौ मूर्ध्ना चरणौ प्रत्यपीडयत् ॥ ३७॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com